শ্রীঃ
শ্রীমতে রামানুজায নমঃ
শ্রীমতে নিগমান্তমহাদেশিকায নমঃ
শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে কিষ্কিন্ধাকাণ্ডে

# ॥ একষষ্টিতমঃ সর্গঃ ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

*His Holiness śrīmad āṇḍavan śrīraṅgam*

শ্রীঃ

শ্রীমতে রামানুজায নমঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীসীতালক্ষ্মণভরতশত্রুঘ্নহনুমৎসমেত শ্রীরামচন্দ্র পরব্রহ্মণে নমঃ

# ॥ একষষ্টিতমঃ সর্গঃ ॥

## সম্পাতিনা নিশাকরমুনিং প্রতি স্বপুঙ্খদাহকারণস্য ৱর্ণনম্

ততস্তদ্ দারুণং কর্ম দুষ্করং সহসা কৃতম্।
আচচক্ষে মুনেঃ সর্ৱং সূর্যানুগমনং তথা॥ **4.61.1** ॥

ভগৱন্ ৱ্রণযুক্তৎৱাল্লজ্জযা চাকুলেন্দ্রিযঃ।
পরিশ্রান্তো ন শক্নোমি ৱচনং পরিভাষিতুম্॥ **4.61.2** ॥

অহং চৈৱ জটাযুশ্চ সঙ্ঘর্ষাদ্ গর্ৱমোহিতৌ।
আকাশং পতিতৌ দূরাজ্জিজ্ঞাসন্তৌ পরাক্রমম্॥ **4.61.3** ॥

কৈলাসশিখরে বদ্ধ্ৱা মুনীনামগ্রতঃ পণম্।
রৱিঃ স্যাদনুযাতৱ্যো যাৱদস্তং মহাগিরিম্॥ **4.61.4** ॥

অপ্যাৱাং যুগপৎ প্রাপ্তাৱপশ্যাৱ মহীতলে।
রথচক্রপ্রমাণানি নগরাণি পৃথক্ পৃথক্॥ **4.61.5** ॥

ক্ৱচিদ্ ৱাদিত্রঘোষশ্চ ক্ৱচিদ্ ভূষণনিঃস্ৱনঃ।
গাযন্তীঃ স্মাঙ্গনা বহ্ৱীঃ পশ্যাৱো রক্তৱাসসঃ॥ **4.61.6** ॥

তূর্ণমুৎপত্য চাকাশমাদিত্যপদমাস্থিতৌ।
আৱামালোকযাৱস্তদ্ ৱনং শাদ্ৱলসংস্থিতম্॥ **4.61.7** ॥

উপলৈরিৱ সঞ্ছন্না দৃশ্যতে ভূঃ শিলোচ্চযৈঃ।
আপগাভিশ্চ সংৱীতা সূত্রৈরিৱ ৱসুন্ধরা॥ **4.61.8**॥

হিমৱাংশ্চৈৱ ৱিন্ধ্যশ্চ মেরুশ্চ সুমহাগিরিঃ।
ভূতলে সম্প্রকাশন্তে নাগা ইৱ জলাশযে॥ **4.61.9**॥

তীব্রঃ স্বেদশ্চ খেদশ্চ ভযং চাসীৎ তদাৱযোঃ।
সমাৱিশত মোহশ্চ ততো মূর্চ্ছা চ দারুণা॥ **4.61.10**॥

ন চ দিগ্ জ্ঞাযতে যাম্যা ন চাগ্নেযী ন ৱারুণী।
যুগান্তে নিযতো লোকো হতো দগ্ধ ইৱাগ্নিনা॥ **4.61.11**॥

মনশ্চ মে হতং ভূযশ্চক্ষুঃ প্রাপ্য তু সংশ্রযম্।
যত্নেন মহতা হ্যস্মিন্ মনঃ সন্ধায চক্ষুষী॥ **4.61.12**॥

যত্নেন মহতা ভূযো ভাস্করঃ প্রতিলোকিতঃ।
তুল্যপৃথ্ৱীপ্রমাণেন ভাস্করঃ প্রতিভাতি নৌ॥ **4.61.13**॥

জটাযুর্মামনাপৃচ্ছ্য নিপপাত মহীং ততঃ।
তং দৃষ্টৱা তূর্ণমাকাশাদাত্মানং মুক্তৱানহম্॥ **4.61.14**॥

পক্ষাভ্যাং চ মযা গুপ্তো জটাযুর্ন প্রদহ্যত।
প্রমাদাৎ তত্র নির্দগ্ধঃ পতন্ ৱাযুপথাদহম্॥ **4.61.15**॥

আশঙ্কে তং নিপতিতং জনস্থানে জটাযুষম্।
অহং তু পতিতো ৱিন্ধ্যে দগ্ধপক্ষো জডীকৃতঃ॥ **4.61.16**॥

রাজ্যাচ্চ হীনো ভ্রাত্রা চ পক্ষাভ্যাং ৱিক্রমেণ চ।
সর্ৱথা মর্তুমেৱেচ্ছন্ পতিষ্যে শিখরাদ্ গিরেঃ॥ **4.61.17**॥

॥ ইত্যার্ষে শ্রীমদ্রামাযণে ৱাল্মীকীযে আদিকাৱ্যে
কিষ্কিন্ধাকাণ্ডে একষষ্টিতমঃ সর্গঃ ॥